सामोक्त्या धार्तराष्ट्रे निरवधिकरुषोद्धूतहस्त्यालयस्तं
व्यामुञ्चन् धाम यातस्तव गुरुपवनागारनाथ प्रपायाः ॥१०॥

२९

भूमन्नर्कोपरागे पुरकृतकृतवर्मानिरुद्धः सघोषः
प्राप्तः प्रीतः समन्तोपरिसुपरिमिलत्पञ्चकं नाम तीर्थम् ।
भूयस्तत्रावगाह्य द्विजगणपरिमुक्तार्थसङ्घैः समेतः
पार्थाद्यैस्त्वं प्रियाभिस्तव परिमिलिता याज्ञसेनी जहर्ष ॥१॥

त्वत्प्रेयस्युक्तनानाविधतरभवदाहृत्युपायश्रवात् सं-
तुष्टाभूद् याज्ञसेनी तदनु च पशुपान् वीक्ष्य तान् मानयित्वा ।
त्वद्विश्लेषातिशुष्यत्तनुभिरयि विभो वल्लवीभिः सबाष्पं
तत्र त्वं दृष्टमात्रः पुरुकुतुकमसूरन्वयासीः प्रहासी ॥२॥

आश्लेषाद्यैः पुरेवाजित पशुपवधूर्मज्जयन् मोदसिन्धौ
विश्लेषार्ति वदन्त्याः पृथुकुचकलशे राधिकाया न्यलैषीः ।
विश्लेषार्ति मनागुद्धववचनविनष्टावशिष्टां विशिष्टै-
स्तुष्टस्तासां वचोभिः पुनरपि शमयित्वासु चालीयथास्त्वम् ॥३॥

प्रारब्धे तत्र यागे तव खलु जनकेनाघनाशाय चाघै-
    र्हीनेनाप्यद्भुतात्मन्ननवरतभवत्सन्निधानादिपुण्यैः ।
गोपा गोप्यः पुरावत् सहवसतिसुखं तेऽनुभूय त्रिमासं
    याता गोष्ठं समाप्तक्रतुपितृसहितस्त्वं च गेहं स्वमागाः ॥४॥

बन्धक्लेशं विहन्तुं नृपकुलमहिनोन्मागधेनाथ बद्धं
    बन्धक्लेशच्छिदे तेऽष्टकशतयुतविंशत्सहस्रप्रमाणम्(?) ।
बन्धुं कञ्चित् ततोऽस्मिन्नपि तव पुरमागत्य तद्याचमाने
    बन्धूनां न्यस्तभारं त्वयि मखमशृणोर्नारदात् पाण्डवानाम् ॥५॥

कार्यद्वय्याकुले त्वय्यखिलविजयिनः सप्ततन्तोर्द्वयं तत्
    कार्यं साध्यं सभायामिति वदति महत्युद्धवे जातमोदः ।
साकं त्वं बन्धुवर्गैः शमनसुतमितोऽभ्यर्थितस्तेन जेतुं
    साकं भीमार्जुनाभ्यां मगधपतिमभूः प्रेषितो विश्वजेता ॥६॥

विप्रव्याजेन गत्वा मगधपमवृथा युद्धमाभ्यां समेतः
    क्षिप्रं भीमेन साकं स च खलु युयुधे जातसादे च भीमे ।
दृष्ट्वोपायं त्वया दर्शितमहितममुं दारयत्याशु भूपान्
    मुक्त्वादिश्यावितुं गां शमनसुतमगाः सार्जुनस्त्वं सभीमः ॥७॥

भक्ताढ्ये राजसूयं कृतवति सवनं धर्मजे भूसुराणां
    चित्रं पादावनेजादिकमकृत भवान् भक्तदासः सभायाम् ।
भक्त्या तेऽथाग्र्यपूजां कृतवति सहदेवोक्तिमाश्रित्य भूपे
    तुष्टे निश्शेषलोके स तु बत कुमतिश्चुक्षुभे चेदिराजः ॥८॥

स्त्रीघ्नं गोघ्नं गुरुघ्नं कपटपटुममुं गोपकं हन्त कोऽर्च्यात्
पूजार्हेष्वत्र सत्स्वित्यतिकुपितमतिः सायुधः प्रोदतिष्ठत् ।
तावत् क्रुद्धांस्तु पार्थानरिनिकटगतान् वारयन् स्वारिणा त-
च्छीर्षं भिन्दत्यगात् त्वय्ययमपि भवदैक्यं चिराद्वैरयोगात् ॥९॥

यागे सम्यक् समाप्ते जयति मुररिपुर्धर्मजश्चेति पुष्य-
न्मोदे जाते जनौघे मयविहितसभायां स्थलाम्बुभ्रमेण ।
मूढेऽस्मिन् धार्तराष्ट्रे भ्रमति सति समुज्जृम्भयन् याज्ञसेन्या
हासं कौरव्यशल्यायितममलदृशा पाहि मां मारुतेश ॥१०॥

३०

साल्वे भैष्मीविवाहे यदुवरविजिते व्योमकेशाद् विमानं
सौभं प्राप्य प्रभञ्जत्ययि तव पुरमाकर्ण्य तद्धस्तिनस्थः ।
प्रद्युम्नास्त्रप्रमीताधिकभटजनवीरद्युमन्मन्त्रिणं तं
गत्वा क्रुद्धो न्यरुन्धाः स च तव जनकं माययोत्थं व्यहिंसीत् ॥१॥

क्षिप्त्वा सौभं समुद्रे तमरिमरिनिकृत्तं त्वया तन्वताथो
युध्यन् कौमोदकीघट्टनविगलदसुर्दन्तवक्रो हतोऽभूत् ।
तस्मिन्नप्यैक्यमाप्ते कुरुवरनिकृताया हरे याज्ञसेन्याः
कृत्वानन्तं दुकूलं सकरुण कपटद्यूतकेऽपालयस्ताम् ॥२॥

त्रस्ता दुर्वाससः साशनमभिलषतस्त्वां व्यचिन्तीदनन्ना
गत्वा शाकान्नभुक्त्या मुनिकुलमकरोस्तृप्तिमत् काननान्ते ।
युद्धोद्योगे वृतस्त्वं तदनु च विजयेनात्तदौत्यस्तदर्थं
गत्वा कौरव्यमेनं सकलमपि वदन् धिक्कृतोऽभूः खलेन ॥३॥

क्रुद्धत्वद्विश्वरूपेक्षणचलितजनायां सभायां कुरूणां
क्षत्ता भूत्वार्जुनस्याकुलमलममुमालोक्य मित्रौघघाते ।
उक्त्वा विज्ञानवाक्यान्यजित धृतमहाविश्वरूपोऽस्य शङ्का-
भेत्ताभूर्भीष्मयुद्धे महति सति ततः प्राप्तसादोऽर्जुनोऽभूत् ॥४॥

निश्शस्त्रत्वप्रतिज्ञां प्रतिघमभिनयन् प्रोज्झ्य चक्र्यन्वधावो
भीष्मं सोऽप्यानमत् त्वां क्वचिदथ भगदत्तस्य नारायणास्त्रे ।
भूषाजाते तवोरस्यरिपिहितरविः प्रार्दयः सिन्धुराजं
नागास्त्रं चाकृथास्त्वं क्षितिमवनमयन् निष्फलं कर्णमुक्तम् ॥५॥

युद्धादौ तीर्थगामी स खलु मुसलभृन्नैमिशक्षेत्रमृच्छन्
हत्वानुत्थायिसूतं बत सुतमदसीयं पदे तस्य तन्वन् ।
हत्वा यज्ञद्रुहं पर्वणि कुपितमतिर्वल्कलं स्नाततीर्थो
युद्धान्ते भीमदुर्योधनमृधमशमं वीक्ष्य सोऽगात् पुरीं ते ॥६॥

सुप्तानां स्वात्मजानां गुरुतनयकृतं निग्रहं याज्ञसेन्यां
श्रुत्वा सम्मोहितायां त्वमपि सविजयो द्रौणिमापोऽथ पार्थे ।
सत्रा तन्मौलिरत्नेन च तव वचसा ब्राह्ममेतत्प्रयुक्तं
हर्तर्यस्त्रं पुनश्चोत्तरेजठरमगात् तच्छरो गर्भहान्यै ॥७॥

तद्गर्भान्तप्रविष्टत्वदरिघृणिविदग्धे शरेऽस्मिन् स भीष्म-
श्चोक्त्वा धर्मान् समस्तान् शमनसुतनृपायागमद् ब्रह्मभूयम् ।
देव त्वं चाश्वमेधैस्त्रिभिरतिमहितैर्धर्मजन्मानमेनं
संयाज्याविश्य धाम स्वकमथ सुदृशो लालयन् सन्न्यवात्सीः ॥८॥

भूमन् विप्रः कदाचित् तव परमसतीर्थ्यत्वमाप्तः कुचेलः
प्रोचे पत्न्या प्रिय त्वं भज तव सुहृदं माधवं वृत्तिलब्ध्यै ।
एवं क्षुत्पीडयासावपि तदनु भवद्गात्रसन्दर्शनोत्कः
प्रापत् त्वां प्राभृतार्थं दधदयि पृथुकान् जीर्णवस्त्रैकभागे ॥९॥

भूयस्त्वत्पूजितं तं द्विजमथ रमया वीजितं भीष्मपुत्र्या
मोदाकूपारमग्नं तव वपुरवलोकेन पाणौ गृहीत्वा ।
पूर्वोदन्तं न्यगादीर्गुरुवरगृहिणीचोदितैरिन्धनार्थं
प्राग्वर्षं काननेऽभ्रम्ययि सखि भवता विस्मृतं वाधुनैतत् ॥१०॥

वीळालोले कुचेले पृथुकमथ बलादाहरन् मुष्टिना तं
प्राश्नन् संवारितोऽभूरलमिति रमया सोऽपरेद्युर्विना स्वम् ।
यातो याचे स्म चेद्दास्यति हरिरहमार्यां ब्रुवे किन्तु मार्गे-
ऽप्येवं चिन्तां वितन्वन्नहह मणिमयं गेहमग्रे ददर्श ॥११॥

पत्नीं च त्वत्प्रभावान्मणिकटकमुखैर्मण्डिताङ्गीं स दृष्ट्वा
स्मृत्वा स्मृत्वा विलासांस्तव खलु नितरां मोदमग्नो न्यवात्सीत् ।
उक्त्या मातुश्च कंसप्रमथितसुतषट्कं बलेः सन्निधाना-
न्नीत्वाऽस्यै तत्प्रदर्श्य स्वपदमनयथाः सोऽव मां मारुतेश ॥१२॥

३१

देवं देव श्रुताद्यं द्विजकुलजनुषं मैथिलं प्राप्य राज्यं
भूपं चानुग्रहीतुं क्वचिदथ बहुलाश्वं द्विमूर्तिर्द्वयोश्च ।
गेहे यातोऽच्युताभ्यर्चित इह युगपत् कन्दपक्वादिनैके-
नान्येनान्नादिभोज्यैः सममथ मुदितो मुक्तिमाभ्यामदास्त्वम् ॥१॥

श्रुत्वा विप्रस्य रोदं सुतमृतिविधुरस्यावसो मौनिवत् त्वं
नष्टा अष्टापि पुत्रा विविधमपि जने भाषमाणे स पार्थः ।
गत्वा त्वद्धाम तिष्ठन् नवमसुतमृतौ विप्ररोदं च शृण्वन्
चक्रे मानी प्रतिज्ञामनवितनयो वर्ष्म भस्मीकरिष्ये ॥२॥

अस्त्रौघैः सूतिगेहं द्विजवरसुदृशः सन्निरुध्याथ भूयः
पुत्रे दृष्टे विनष्टे भुवि दिवि च तमन्विष्य चावीक्ष्य पार्थम् ।
नश्यद्दर्पं निवार्याजित शिखिनि पतिष्यन्तमेतेन साकं
विक्रामंश्चक्रवालं ह्यहर उरुतमश्चक्रधाम्ना रथेन ॥३॥

गत्वा दुग्धाब्धिमध्यं फणिवरशयनं दिव्यभूषायुधाङ्गं
शुद्धं चाम्नायमूलं विधिहरमुनिमुख्यैडितं चिन्मयं त्वाम् ।
दृष्ट्वा पार्थेन साकं त्वयि नमति युवां द्रष्टुकामोऽनयं भोः
कृष्णामून् विप्रपुत्रान् नयतमिति वदंश्चित्स्वरूपो ददौ तान् ॥४॥

नत्वा त्वां त्वं सपार्थः क्षितितलमुपविश्याथ विप्राय दत्वा
पुत्रान् विप्रेण पार्थेन च नुतमहिमा सच्चिदात्मन् न्यवात्सीः ।
प्राप्ते विज्ञानसारं तव पितरि विभो नारदात् त्वत्प्रसादात्
त्वत्तो लब्ध्वोद्धवस्तत् स तु सुजनहितायाधुनास्ते बदर्याम् ॥५॥

ये ये भूमन् भजन्ते विमलतरहृदा वीतसङ्गा भवन्तं
तेषां मुक्तिः कराग्रे ध्रुवमजित कदापि च्युतिर्नैव भूयात् ।
केचिच्छर्वादिदेवान् क्षणमुदितमनीन् क्षिप्रकोपानशान्ताः
सेवित्वाधः पतन्त्यत्र तु शकुनिसुराः स्वष्टदृष्टान्तभूताः ॥६॥

आविष्कृत्यैकदा धूर्जटिमुरुतपसा वासरैः सप्तमात्रै-
र्वाचा वीणाधरस्य द्रुतमुदमवृणोच्छ्रकुनेयोऽखिलानाम् ।
पाणिस्पर्शेन मृत्युं शिरसि ददुषि च वीक्षणे तत् तमेवा-
धावत्यस्मिन् प्रभीतः शिवशिव गिरिशश्चाद्रवत् पृष्ठदृष्टिः ॥७॥

जोषं तिष्ठत्सु सर्वेष्वधिकपरवशे धूर्जटौ ब्रह्मचारी
प्रादुर्भूयासुराग्रे वदति च भगवन् भोः पिशाचस्य वाक्ये ।
विश्वासस्तेऽस्ति किं मे गिरि यदि तव शङ्काङ्गुलीं मूर्ध्नि कुर्वि-
त्युक्तः स्पृष्टोत्तमाङ्गोऽमृत बत भगवंस्त्वत्पराचां क्व भद्रम् ॥८॥

भूमन् सारस्वतैस्तैर्मुनिवरनिवहैः प्रेषितो ज्ञातुकामै-
र्मूर्तित्रय्यां महद्भिर्भृगुमुनिरधिकां सत्त्वतां सोऽथ दृष्ट्वा ।
धातुर्भर्गस्य कर्म स्वगुणसमुचितं सुप्तमङ्के रमाया-
स्त्वां निघ्नन्नङ्घ्रिणायं द्रुतमथ भवता वन्दितोऽभून्मुनीन्द्रः ॥९॥

भूमन् सर्वं क्षमस्वोरसि मम तव यत् पादचिह्नं तदत्र
श्रीवत्साख्यान्वितं भूषणमिति कलये नित्यमेवं त्वयोक्तः ।
सोऽगात् सन्तुष्टचेता मुनिवरनिवहाश्चेतदाज्ञाय तं त्वां
सेवित्वा मुक्तिमापुर्ननु सकलजनैः सेवनीयस्त्वमेव ॥१०॥

विष्णो दुर्वारगर्वान्धितनृपतिकृतक्ष्माभरध्वंसनार्थं
कृष्णो भूत्वाथ कृत्वा खलजनविहतिं शिष्टरक्षां तदन्ते ।
पुष्णन् द्वेषानुरागप्रणयभयवशात् त्वद्गतस्वान्तनॄणां
विश्वात्मन् मोक्षलक्ष्मीं मम च दिश विभो वातनारेश मोक्षम् ॥११॥

३२

कृष्ण त्वदङ्घ्रिभजनं भयहारि मन्ये
मग्नस्य मर्त्यनिवहस्य भवाब्धिमध्ये ।
यस्त्वत्परः स तु चरन्नपि मोहमार्गे
कुत्रापि न स्खलति तस्य पुनः कुतो भीः ॥१॥

यद्यत् करोमि भगवंस्तनुवाङ्मनोभि-
स्त्वत्प्रेरितो भवति तत्तदिहार्पयामि ।
त्वद्दत्तकर्मनिवहः श्वपचोऽपि लोकं
शुद्धं करोति विमुखस्त्वयि नैव विप्रः ॥२॥

भीरन्यतोऽस्ति ननु मानसकल्पितोऽन्य-
स्तेनैवयचिन्तनपरो भयमाशु जह्याम् ।
मायाहृते हृदि न भाति तथा ततोऽस्या
नाथं भजन्नभय एष भवेच्च भक्त्या ॥३॥

भक्तेर्जनिस्तदभिवृद्धिरपीह लभ्या
त्वत्पादसेवकजनाश्रयतस्ततो मे ।
तत्सङ्गतिं कुरु तदास्यविलोमिषड्भि-
स्त्वत्कीर्तनैर्भवति भक्तिरहो द्रढिष्ठा ॥४॥

मुक्तिप्रदासु सरणिष्वधिकादरोऽहं
भक्तावनन्तमहिमन्नवतारलीलाः ।
नित्यं च नामनिवहांश्च पठन् द्रुतात्मा
नृत्यन् रुदन् ववचन हास्यपरश्चरेयम् ॥५॥

भूतानि भूतमयमानुषतिर्यगादीन्
　　शत्रून् समांश्च सुहृदो भवदात्मबुद्ध्या।
तुष्ट्यानमान्यथ ममेति भवत्परस्य
　　भक्तिर्विभक्तिरपि मुक्तिरपीश सिद्ध्येत् ॥६॥

त्वच्चिन्तनामृतरसाधिकपानतृप्त-
　　चित्तस्य मे क्व नु तृडार्तिरपि क्षुधार्तिः।
इष्टेषु तुष्टिमपि शोकमनिष्टजाले
　　त्यक्त्वा चरेयमिह मायिकतावबोधात् ॥७॥

भूमंस्त्वदैक्यमयचिन्तनयोग्यताद्य
　　भूतेषु नो यदि ममास्तु भवत्यमेयम्।
प्रेम त्वदीयहितताद्यथवा त्वदर्चा-
　　दास्यादरं दिश ततोऽप्यहमुत्तमः स्याम् ॥८॥

आवृत्य रूपमयि ते विमलां क्षिपन्ती
　　जीवान् स्वकर्मविवशान् व्यसनेषु माया।
मां माभिभूदयि पुरा त्वयि भक्तिरेका
　　मायाजयाय कुशलेत्यवदत् प्रबुद्धः ॥९॥

दुःखानि जन्तुषु विलोक्य विरक्तबुद्धि-
　　र्लब्ध्वा गुरोःकरुणया तव तत्त्वबोधम्।
त्वज्जन्मकर्मकथनोदितभक्तिभूमा-
　　विद्यां तरेयमनिलेश भवत्प्रसादात् ॥१०॥

३३

कर्माणि वेदविहितानि फलानपेक्षं
  त्वय्यर्पितान्यनुचरन्नुचितानि यानि ।
नैष्कर्म्यमागमविरुद्धविधौ ममेच्छा
  मा भूद्विभो कुरु दयां भगवन्नमस्ते ॥१॥

त्वत्क्षेत्रसङ्गतिविधौ धृतकौतुकं मे
  पादं कुरुष्व करमर्चनपुष्पलोलम् ।
त्वन्मूर्तिदर्शनविधौ नयनं च जिह्वां
  त्वत्कीर्तने तव कथाश्रवणे श्रवं च ॥२॥

शूद्राः स्त्रियस्तव कथाश्रवणादिहीनाः
  सर्वेऽपि तेऽजित भवन्त्यधिकं दयार्हाः ।
त्वद्ध्यानकीर्तनमुखेष्वधिकारमाप्ता-
  स्तन्वन्ति हा क्षितिसुरा न हि तानि दृप्ताः ॥३॥

पापो ह्ययं निजकुवृत्तिविधानकामः
  श्रीकृष्ण राम इति नामजपं करोति ।
भ्राता सदा मम हरिं भजते किलाद्ये-
  त्येते हसन्ति सरसांस्त्वयि हन्त कष्टम् ॥४॥

श्वेतं कृते मुनितनुं तपसा भजन्ते
  त्रेतायुगे मखतनुं ह्यरुणं यजन्ते ।
श्यामं युगेऽन्यति(?) भजन्ति नरोऽत्र मार्गै-
  र्नीलं कलौ नुतिभिरेव भजन्ति तं त्वाम् ॥५॥

कालः कलेरयि जयत्ययमत्र यत् त्वां
    नाम्नां जपेन भजतां प्रददासि मुक्तिम् ।
जाताः कृतादिषु कलौ किल कामयन्ते
    हा जन्म तत्र जनितं परिपाहि मां त्वम् ॥६॥

भक्ताः कलौ द्रमिलभूषु ततोऽधिकाः स्युः
    कावेरिकादिसरिदन्तरवासिनस्ते ।
मां चैतदन्तरजमप्ययि किञ्चदञ्चत्-
    स्नेहं त्वयि भ्रमय मा भगवन्नमस्ते ॥७॥

पश्यन् वृषद्रुहममुं स पुरा परीक्षि-
    द्धन्तुं कलिं व्यवसितोऽपि न चावधीत् तम् ।
स्मृत्वा गुणांशमिह नामजपादिनैव
    सिध्येद् गतिर्द्रुतमसौ भवदीयभीरुः ॥८॥

एकादशी च तव नामजपश्च साळ-
    ग्रामार्चनं च तुलसी च सरिच्च गीता ।
गायत्र्यपीह गतिदा लघु गोपिका चे-
    त्याहुर्बुधाः कलियुगेऽस्तु रतिर्मदर्हे ॥९॥

कृत्यान्युपेक्ष्य सकलान्यपि सर्वथापि
    यस्त्वां सदा भजति तस्य नहि प्रपीडा ।
आत्मन्यृणत्रयकृतास्यविकर्मजातं
    चित्तस्थितो नुदसि यन्मरुदीश पायाः ॥१०॥

३४

स्नेहं विमुच्य सुहृदादिषु दत्तचित्ता-
श्चेतोहरे त्वयि निरीक्ष्य जगत् समस्तम् ।
मायाविलासमयि केचिदहो भजन्ति
त्वां योगिनो वयमपि प्रणुमो भवन्तम् ॥१॥

क्षुत्तृड्विलोपरतजन्तुषु पूरुषो हि
विज्ञानवत्त्वत इनः सुलभं न लोके ।
तज्जन्म चाप्त च सुहृद्रिपुरस्ति चात्मा
स्वस्यैव यस्त्वयि रतः स सुहृत् परोऽरिः ॥२॥

उर्व्याः क्षमां पवनतो विषयाप्रसक्ति
निर्लेपतादि वियतो जलतोऽमलत्वम् ।
सर्वान्नभोजनविधावनवद्यताद्यं
गृह्णन्ति मारुतसखाद् भवदात्मनिष्ठाः ॥३॥

इन्दोः कलोपचयहानिवदत्र वेत्ति
वृद्धिक्षयौ च वपुषस्तु न चात्मनस्तौ ।
अम्ब्वादिबिम्बितविरोचनवच्छरीरे·
ष्वेकत्वमात्मन इहाजित वेत्ति विद्वान् ॥४॥

स्नेहान्मृतो मृगयुकृत्तसुतेषु पत्न्या
साकं कपोत इव नैव भवेत् सुविद्वान् ।
सोऽस्त्याप्तमेव शयुवत्पुनरप्यगाधो
भूयात् समुद्र इव भृङ्गवदात्तसारः ॥५॥

मोहात् पतङ्ग इव तेजसि योषिदादौ
　ज्ञो नो पतेद् भ्रमरवद् धनवृद्धिमोहात् ।
नाशं गतो नहि भवेदयमम्बुजाक्ष्या
　नो बध्यते गज इवाच्युत हा करिण्या ॥६॥

अर्थौघमेष न तु सञ्चिनुयात् तमन्यो
　हर्तेव हा मधुहरो मृगवन्न मुह्यात् ।
त्वद्गीतितोऽन्यपरिगीतिभिरेष नश्येत्
　सक्त्या रसेन बळिशे झषवत् परात्मन् ॥७॥

सुप्यान्निराशमतिरेष तु पिङ्गलाव-
　द्दुर्तव्ययोगत उपैति लयं न योगी ।
पत्रीव चात्तपललः कुररः पुनश्च
　मुक्त्वा चरेद्बहुरमति शिशुवत् प्रहृष्टः ॥८॥

कन्यैकशेषवलयस्त्विव वर्ततेऽसा-
　वन्योन्यघोषरहितोऽन्यदयं त्वदात्मा ।
नो वेत्ति राजगमनं शरकृद्वदन्य-
　गेहेऽहिवद् वसति मूषिकमन्दिरेषु ॥९॥

यत् त्वत्कृतं जगदिदं क्षपयस्यथ त्वं
　त्वय्येव चेत्युपदिशत्ययमूर्णनाभः ।
त्वच्चिन्तनं कलयते भवदीयरूप-
　मित्थं स पेशकृदहो विदुषो मुमुक्षोः ॥१०॥

विड्भस्मकात्मतनुरेकगुरुर्विवेकं
धत्ते विरक्तिमपि सात्र भवत्परस्य ।
इत्थं बुधा गुरुमुखोदितमुक्त्युपाया
मुक्तिं व्रजन्ति कुरु तादृशमीश मां त्वम् ॥११॥

मद्देहमोहमहह त्यज मारुतेश
यद्वा कुरुष्व पदपङ्कजसेवकं माम् ।
मुक्तिप्रदास्यजजनिं द्रुतमारुरुक्षुं
भ्रष्टं न कुर्वजित मामव मारुतेश ॥१२॥

३५

निष्कामधर्मपरिशुद्धहृदः स्वरूपं
शुद्धं तु ते परचिदात्मकमीश भूमन् ।
नित्यं निरामयमनन्तमहःप्रपूर्णं
निष्कल्मषं खलु विदन्ति बुधा महान्तः ॥१॥

यस्त्वत्कृपाबलवशेन गुरोः सकाशात्
सद्बोधमीश लभते स भवत्यवश्यम् ।
प्राक्कर्मसंस्कृतिकृतं भ्रममाशु मुञ्चन्
प्रापञ्चिकं बत भवान् परचित्सुखात्मा ॥२॥

तस्मादमुं च कुरुतात् करुणापयोधे
त्वत्प्राप्तियत्ननिरतं परिमुक्तसङ्गम् ।
त्वत्प्राप्तितोऽन्यमखिलेश न वेद्म्युपायं
मत्क्लेशहानिविधये भगवन् नमस्ते ॥३॥

यद् ब्रह्मणोऽपि न सुखं द्विपरार्धहानौ
त्वत्तो भिया निवसतः खलु सत्यलोके ।
तत् का कथा पुनरधर्मकृतादरणां
तच्छिन्धि बन्धमज मे करुणैकसिन्धो ॥४॥

याथार्थ्यतो यदि न बन्धविमोचने ते
ते शक्तियुग्मरचिते त्वियती भिदा स्यात् ।
तद्धर्मिणोरनुभवन् विषयानथैक-
स्तिष्ठंस्तनौ नहि परः स हि निर्व्यथात्मा ॥५॥

जीवद्विमुक्तगतिरीदृगितीश किं वा
वाचा फलं नियमिनामपि कृच्छ्रसाध्या ।
सेयं तथापि सुलभा लघु भक्तिभङ्गि-
स्तेनास्य मे प्रदिश भक्तिभरं वरिष्ठम् ॥६॥

शास्त्रेषु केचिदमितेषु कृतप्रयत्ना-
स्त्वां नो विदन्त्यहह ते खलु वन्ध्ययत्नाः ।
तैर्नोक्तमीश तव जन्मकथादि सच्चि-
द्रूपं च कारुणिक मा कुरु तादृशं माम् ॥७॥

यादृग्विधस्त्वमिति नो किमपि प्रभूमन्
जानामि यद्यपि भजेऽजित चैद्यवैरिन् ।
स्नेहोऽधिकस्त्वयि सदा भवदङ्घ्रिदासैः
सौहार्दमप्ययि ममास्तु तव प्रसादात् ॥८॥

यद्यल्लभेऽहमखिलं त्वयि चार्पये तत्
त्वद्गेहमार्जनमुखं मम कर्म चास्तु ।
तं त्वां नमामि तपनानलबाडवाद्ये-
षूद्यच्चतुर्भुजमहं बहुभक्तिभूमा ॥९॥

ऐश्वर्यं दुरापमपि ते व्रतहोमपूर्वै-
स्त्वत्सङ्गमेन परमेतदगुश्च गोप्यः ।
भक्तेषु भक्तिमधिकां प्रशशासिथाऽतां
भक्तिं परां मम च देहि मरुत्पुरेश ॥१०॥

३६

आदावनन्तमहिमन् कमलोद्भवः सन्
मायावृतो निखिलजीवमयोऽप्यसि त्वम् ।
सोऽहं तु भक्तिमयसत्त्वधुतान्धकारः
प्राप्स्यामि ते तु कृपया परचिन्मयं त्वाम् ॥१॥

सत्त्वोत्कटोऽपि रजसा तमसाभिभूतो
मर्त्यः क्वचिद् भ्रमति हा विषयप्रसक्तः ।
तद्बोधनाय सकलैर्भवदीयभक्तिः
साध्येति हंसवपुषा भवता बभाषे ॥२॥

श्रेयांसि सन्त्यपि बहूनि मुनीरितानि
प्राक् कर्मिणां स्वरुचिभेदवशेन भूमन् ।
श्रेयस्तु भक्तिरधिका महितेति सख्ये
प्रोचे भवान् यदिह वर्धय मे सुभक्तिम् ॥३॥

त्वद्भक्तितुष्टमनसः पुरुषस्य चाशा
  निष्कल्मषस्य सकला अपि सौख्यमय्यः ।
अद्धा स्वयं समनुपातिनि मोक्षसौख्ये-
  ऽप्यश्रद्ध एष भगवन् किमुतान्यसौख्ये ॥४॥

त्वत्पादभक्तिपरिशुद्धमनास्तु मर्त्य-
  स्त्वद्भक्तिभीरुभिरहो विषयैर्न बाध्यः ।
अग्निप्रदग्धतरुवद् वृजिने तु भक्त्या
  भस्मीकृते विषयिणां क्व मदः क्रमेण ॥५॥

चित्तार्द्रतां च पुलकं त्वपि हर्षबाष्पं
  हित्वा कथं विगतभक्तिरहो विशुध्येत् ।
चित्तं किमुक्तिबहुलैर्भवदीयभक्ति-
  शुद्धात्मको भजति चिद्रसमीश शीघ्रम् ॥६॥

ध्यानं निषण्ण इह ते परिशीलयेयं
  नासाग्रदत्तनयनो जितवायुमार्गः ।
ऊर्ध्वाग्रभावितमनोम्बुरुहोपरिष्टाद्
  ध्यात्वारुणाब्जशिखिनः कलयेऽग्निगं त्वाम् ॥७॥

श्यामं सुनीलचिकुरं मकराभकुण्ड-
  लालङ्कृतं मृदुलहासविकासरम्यम् ।
श्रीकौस्तुभद्युतिलसद्वनमाल्यहार-
  श्रीवत्सवक्षसमहं स विभावये त्वाम् ॥८॥

शङ्खारिपङ्कजगदाङ्कितदोश्चतुष्कं
सम्पूर्णभङ्ग्युदरमावृतपीतचेलम् ।
पङ्केरुहद्युतिपदं परिपूर्णशोभं
पङ्केरुहाक्ष सततं कलये भवन्तम् ॥९॥

केशादिपादमपि वा चरणादिकेशं
ध्यायन्मुहुर्मुहुरथास्यविधौ विधाय ।
चेतश्चिदात्मनि पुनः कलयंस्ततोऽन्य-
न्नो चिन्तयन्निह वसामि मरुत्पुरेश ॥१०॥

३७

ब्रह्म त्वमेव भगवन् परमं पुनस्त्वं
वर्णेष्वकार उरुमन्त्रगणेषु तारः ।
राज्ञां मनुर्मुनिकुले भृगुनारदौ द्वौ
प्रह्लाद ईश दनुजेषु गवां द्युधेनुः ॥१॥

पत्रिव्रजेषु विनतातनयोऽस्यनन्तः
सर्पेषु निर्जरसरित् सरितां बलिस्त्वम् ।
ब्रह्मण्यकेषु सवनेषु जपाख्ययज्ञो
विक्रान्तिमत्सु विजयोऽस्यखिलेश भूमन् ॥२॥

भक्तेषु चोद्धववरो बलिनां बलं च
तेजस्विनां तदपि जीववतां हि जीवः ।
यन्नासि विश्वभुवनात्मक तत्तु लोके
किन्नाम तादृशमहामहिमन् नमस्ते ॥३॥

वर्णाश्रमाद्यखिलधर्ममतीव भक्त्या
    कुर्वन् भवत्परतया श्रुतिकल्पितं यः ।
अन्तर्विरागविमले हृदये क्रमेण
    सर्वं त्यजन् स लभते भवदात्मबोधम् ।।४।।

भक्तिं विबोधमपि वा त्वरितं लभन्ते
    मर्त्यास्तु पुण्यविभवाज्जनिमत्र लोके ।
तत् काङ्क्षति त्रिदिवगः खलु नारको वा
    दिष्ट्यात्र लब्धजननं परिरक्ष मां त्वम् ।।५।।

प्राप्तुं त्वदैक्यमिह केवलमाद्रियन्ते
    द्राग् ज्ञानयोगमथ कर्मपराश्च केचित् ।
ते प्राप्नुवन्त्यतिचिराय फलं हि तस्य
    या भक्तिराशुफलदा त्वयि सा ममास्तु ।।६।।

ज्ञानाय यत्नमतिमात्रमृषिर्निषेध-
    त्याकर्ण्य सारतमवस्तु दृढं रतो यः ।
ते भक्तिभूम्नि गतिमेत्ययमाशु चेत-
    श्चाञ्चल्यतोऽसुकरमात्मविचिन्तनं ते ।।७।।

त्वज्जन्मकर्मकथनादिषु सादरोऽपि
    शक्नोमि हातुमिह नाहमनन्तकामान् ।
यद्यप्ययि त्वयि निधाय मनः क्रमेण
    त्वत्कीर्तनाद्युदितभक्तिरुपैमि मुक्तिम् ।।८।।

कृच्छ्रार्जितार्थलयनिर्मलधीर्नृनुन्नः
कश्चिद् वदन्निति पुरा द्विज एष लोकः ।
नो कालकर्मखचरा मम दुःखहेतु-
श्चेतस्त्वशान्तमथ शान्तिपरो गतस्त्वाम् ।।९।।

प्रागुर्वशीं प्रति परं विवशोऽनुभूय
चैळस्तु तामिति वदन् पुनरेष शान्तः ।
यत् स्त्रीसुखं तददतितुच्छमथातिभक्त्या
तुष्टोऽभवद् गुरुमरुत्पुरनाथ पायाः ।।१०।।

३८

त्रैगुण्यभिन्नमिह हीनसमोत्तमं यद्
ज्ञानं च कर्म वसतिः सुखमीश कर्ता ।
श्रद्धा च भोज्यमथ यद्भवदर्चनाद्यं
नैर्गुण्यनिष्ठमखिलं च भवत्परं तत् ।।१।।

त्वन्न्यस्तबुद्धिरहमारचयंस्त्वदर्थं
सर्वं च कर्म विचरन् प्रति पुण्यदेशान् ।
दस्यौ द्विजे च समधीरपि तिर्यगाद्ये
मुक्तावमानमखिलेष्वपि पूजये त्वाम् ।।२।।

ऐकात्म्यबोधमखिलेषु यदा भजेयं
भूतेषु ते करुणया विशदं तदाहम् ।
एकात्मतामनुभजंस्तव सञ्चरेयं
मे देहि भक्तिपथमस्य निदानभूतम् ।।३।।

तद्भक्तियोगदृढताविधये चिरायुः
साध्यं मयात्र च भवद्भजनं विधेयम् ।
मृत्युर्जितः खलु मृकण्डुभुवा भटैस्ते
स्वल्पायुषापि भजतैकसमां पुरा त्वाम् ॥४॥

भूयो निनाय मुनिरेष तु पुष्पभद्रा-
तीरे तपांसि रचयन् मनुभेदषट्कम् ।
तावत् प्रभीतवृषचोदितदेवयोषित्-
कामादिभिः परिवृतोऽपि स नाप मोहम् ॥५॥

नारायणे नरसखे त्वयि तस्य पार्श्वं
याते स्तुवन्नधिकभक्तिरसौ मुनीन्द्रः ।
मायाव्यथानवगमान्त्वजितावृणोत्त्व-
न्मायेक्षणं वरमहो खलु चित्रमेतत् ॥६॥

याते त्वयि श्वसनकम्पितमेघमुक्त-
वारिप्रपूर्णभृशघूर्णितसिन्धुमग्ने ।
लोके भ्रमन्नथ जले स तु वर्षकोटी-
र्दीनो ददर्श वटपत्रशयानकं त्वाम् ॥७॥

अङ्गुष्ठदंशिनमथाद्भुतबालकं त्वा-
मङ्गोल्लसत्पुलक एष निरीक्ष्य मोदात् ।
स्प्रष्टुं कुतूहलमनाः सविधं प्रयात-
स्त्वच्छ्वासमारुतजवेन समागतोऽन्तः ॥८॥

वीक्ष्यात्र सर्वभुवनं बहिरेत्य भूय-
स्तत्रेक्षितः स भवता परिरब्धुकामः ।
तत्र त्वयि स्थगितवर्ष्मणि पूर्ववच्च
स्वस्याश्रमेऽभवदयं बहुविस्मितात्मा ॥९॥

गौर्या समं पुरभिदेनमुपेत्य भूय-
स्तस्मै जरामरणहीनतमा(?)नभीष्टान् ।
दत्त्वा बहूनगमदत्र भवत्प्रियार्थं
मूर्तित्रयात्मक तदीश्वर भावये त्वाम् ॥१०॥

सम्भ्रान्त्युपर्युपरि धातुरधोक्षजस्य
त्र्यक्षस्य चापि सदनान्ययि सत्यलोके ।
एनं तदूर्ध्वगतसर्वमनोभिराम-
वैकुण्ठलोकवसतेऽव मरुत्पुरेश ॥११॥

३९

सृष्टिस्थितिप्रलयकारिणमात्तलीलं
स्रष्ट्रच्युतत्रिणयनात्मकमीश भूमन् ।
भक्त्या जगन्मयमहं जगतां निधानं
तद्धेतुभूतमखिलेश्वरमाश्रये त्वाम् ॥१॥

वाचां धियामपि सुदूरगतं परं ते
देवा विदन्ति मुनयोऽपि नहीश रूपम् ।
जानाम्यहं कथमिहाच्युत यद्यपि त्वां
भूयो नमामि भगवन् मम देहि मोक्षम् ॥२॥

अद्वैतमच्युतमनन्तमनाद्यमीशं
    निष्कल्मषं नियमिनां हृदयाधिवासम् ।
नित्यं निरामयमचञ्चलमस्तसङ्गं
    मुक्तिप्रदं निगमवर्णितमाश्रये त्वाम् ॥३॥

अन्तर्बहिःस्थितमहं निखिलेषु भूते-
    ष्वन्धोऽपि सन्ततविचिन्तनतो भवन्तम् ।
सम्पूर्णशोभमनघं तमनन्तशक्ति-
    मन्ते द्रुतं व्रजितुमीश कृपां कुरु त्वम् ॥४॥

बुद्धीन्द्रियादिरहितं प्रणवस्वरूपं
    शुद्धं विबुद्धमहमव्ययमस्फुटं तम् ।
सच्चिन्मयं गुणविहीनमनन्तरूपं
    निष्किञ्चनं खलु सनातनमाश्रये त्वाम् ॥५॥

आनन्दरूपमुपमारहितं तु निर्वि-
    कारं निरीहमपि निर्ममनादिभूतम् ।
ज्ञानस्वरूपममलैर्मुनिभिः प्रसेव्यं
    वैकुण्ठमीश मनसा कलये भवन्तम् ॥६॥

भूमन्निरञ्जनमहं खलु निर्विकल्पं
    न्यूनातिरेकरहितं खलु निष्कळं त्वाम् ।
आधारशून्यमनिशं निरहङ्कृतिं तं
    वेदात्मकं परमपूरुषमाश्रये त्वाम् ॥७॥

मायाविकाररहितं खलु योगिगम्यं
मायाविलासरसिकं महनीयकीर्तिम् ।
मायाधिनाथमजितं बहुशो भवन्तं
मायां तरीतुमहमीश नमस्करोमि ।।८।।

निष्कारणं निगमकारणमीश तुर्यं
विश्वैककारणमहं करुणार्णवं त्वाम् ।
सत्त्वाद्यनेकगुणकारणमत्यवर्ण्यं
भक्त्या शरण्यमनिशं शरणं प्रपद्ये ।।९।।

त्वद्रूपमीदृशमनन्तरसं क्व भूमन्
चिद्रूप मौढ्यनिलया क्व मतिर्ममैषा ।
यद्यप्यमुं परमकारुणिक प्रभो मां
मुक्तं कुरुष्व गुरुवायुपुराधिनाथ ।।१०।।

४०

जन्मादि तेऽत्र नहि विष्टपपालनार्थ-
मङ्गीकरोति जननाद्यनुसृत्य मायाम् ।
विश्वं च संसृजति पालयते पुनश्च
तत्संहरत्यपि भवान् पुनरेक एव ।।१।।

तत्तादृशस्य महिमानमहो विभो ते
कः कीर्तयत्यजित यद्यपि कीर्तये त्वाम् ।
बुद्धेस्तु शक्त्यनुगुणं त्वमतः प्रसन्नो
मुक्तिं प्रदेहि जगदीश्वर दीनबन्धो ।।२।।

आद्याय विश्वपतये निगमान्तवाक्य-
वेद्याय पण्डितमनोजलजारुणाय ।
प्राप्याय योगिनिवहैरपि भक्तसङ्घैः
श्लाघ्याय सर्वपुरुषैर्भगवन् नमस्ते ॥३॥

हे लोक सम्प्रणम लोकपतिं विभान्तं
भोः कीर्तयध्वमिह साधु दृढं कवीन्द्राः ।
वेदस्य सारमवतारकथाविलासै-
श्चेतोहरैरखिलपापहरैर्महद्भिः ॥४॥

नामास्य भूरि जपतानिशमङ्ग सन्तः
श्रीकृष्ण राम मधुसूदन माधवेति ।
नामैकमप्यलमहो दुरितानि दग्धु-
मेधांसि किं न दहतीह कणोऽपि वह्नेः ॥५॥

एतत्परं सकलमेव करोति कर्म
यः कायतश्च मनसा वचसा स चात्र ।
लोकं विशुध्य च निमज्जति मोक्षसिन्धा-
वेतं भजध्वमखिला अपि तद्विभूत्यै ॥६॥

जातोऽपि चाजित भवत्यपि जायमानः
श्रीकृष्ण ते नहि गतोऽवसितिं महिम्नः ।
तादृग्विधोऽपि भवदीयकथारतं मां
पारं नयस्व भगवन् भवसागरस्य ॥७॥

कांश्चित् करोषि भगवन् व्यसनाब्धिमग्नान्
कांश्चित् करोषि भगवन्नमृताब्धिमग्नान् ।
कांश्चित् स्वकर्मवशतो गदपीडिताङ्गान्
कांश्चित् करोषि च दरिद्रतयाधिकार्तान् ॥८॥

लीलाविलासमयि वेदितुमीश कोऽपि
नालं तवाच्युत हरे भगवन्नमस्ते ।
लोलायताक्ष विकसत्करुणाकटाक्षै-
र्लोलम्बकान्त हर मामकसर्वतापान् ॥९॥

नारायणाय नरकस्य विनाशनाय
नानाविभूषणविभूषितविग्रहाय ।
चेतोहराय भगवन् बहुशो नमस्ते
चेतोम्बुजे निवस मे मरुदालयेश ॥१०॥

४१

अजित विजितमित्रां तप्तहेमप्रकान्त्या
मणिगणखचितं ते मूर्ध्नि देदीप्यमानम् ।
महिततरकिरीटं माधव त्वत्प्रसादा-
न्मम नयनसरण्यां तिष्ठतादन्त्यकाले ॥१॥

अलिकं च हरे विभो त्वदीयं
नलिनारातिकलास्फुटोपमेयम् ।
ललितं तिलकेन दीनबन्धो
हृदयस्थं भवतान्ममान्त्यकाले ॥२॥

अद्भुतविक्रम भगवन्नद्धा भ्रूवल्लरीयुगाभ्यां माम् ।
निर्भरमेनं प्रहर क्रुद्धस्त्वं नात्र शङ्क्यतां सदय ॥३॥

लसितामलकमलच्छदलसदाकृतिविमलं
खलमानसकुलभीषणमितरेष्वतिमृदुलम् ।
क्षिप माधव तव लोचनयुगलं मयि सदयं
चरमे मम समयेऽजित करुणाकर भगवन् ॥४॥

तिलसुमसमचारुतुङ्गनासं
तव मधुराधरबिम्बशोभमानम् ।
कुरवककलिकाभदन्तरम्यं
मुखकमलं स्फुरतान्ममान्त्यकाले ॥५॥

शङ्खनिभकण्ठभुवि यो विलसमानः
कान्ततरकौस्तुभसमाह्वमणिदीपः ।
शुम्भतु तमोजुषि मदीयहृदि भूमन्
बन्धहर बन्धुरतनो स तु ममान्त्ये ॥६॥

श्रीमत्काञ्चनकङ्कणाङ्गदलसद्रत्नाङ्गुलीयोल्लस-
च्छ्रीमद्बाहुचतुष्कसम्भृतगदाशङ्खारिपङ्केरुहः ।
श्रीमद्धारसुवर्णमाल्यवनमाल्योद्दीप्तवक्षस्थलः
श्रीवत्साङ्कः भवान्ममाक्षिपदवीमायातु जीवक्षये ॥७॥

अश्वत्थपत्त्रकृशमध्यनिलीनलोकं
विद्युत्समानवसनं रशनाभिरामम् ।
हस्तीन्द्रहस्तनिभसक्थिविराजमानं
विश्वेश मृत्युसमये कलये भवन्तम् ॥८॥

जानुद्वयं च युगलं जङ्घयोरपि तावकम् ।
प्राणप्रयाणसमये पापं मे हरतां हरे ॥९॥

ब्रह्मत्र्यक्षमहेन्द्रमुख्यविबुधैरासेव्यमानं परं
कञ्जाभं परिलालितं कमलया ते पादयुग्मं हरे ।
तन्मे भातु हृदि प्रणौमि भगवन् हृत्वा मदीयामयान्
सर्वान् हे गुरुवायुगेहवसते मे देहि मोक्षश्रियम् ॥१०॥

नारायणाख्यकविराजकृतातिरम्य-
नारायणीयमुखनुत्यनुसारतोऽयम् ।
नारायणस्य करुणां तव लब्धुकामो
मूढोऽप्यहं नुतिमकार्षमिमां क्षमेथाः ॥११॥

कृष्णावतारप्राधान्यात् कृष्णीयमिति विश्रुतम् ।
कृष्ण स्तोत्रं तवैतत् तु पुष्णीयाज्जपतां सुखम् ॥१२॥

चतुश्शताधिकं पद्यं स्तोत्रेऽस्मिन् पठतामिदम् ।
यच्छताच्छतमेकैकं धर्मं स्वं कामचित्सुखे ॥१३॥

स्तम्बेरमः पुरहर[1]स्त्वचि तद्वन्मनोहरः ।
कष्प्रत्यये कामदुघा तथैव च पयोदुघा ॥१३॥

अप्प्रत्ययान्तोऽपि तथा विस्तरः प्र[2]करो भवः ।
विश्नः प्रश्नश्च यज्ञश्च तथा नङ्प्रत्ययो भवेत् ॥१४॥
अन्तगपारगतुरगग्रामगसुपङ्कजादि डान्तपदम् ।
व्याधः श्वासो ज्वालोऽवश्यायः श्लेष एवमपि णान्तम् ॥१५॥
अण्प्रत्यये चित्राकारः कुम्भकार इहोच्यते ।
तथा घप्रत्ययान्तश्च दन्तच्छद उरच्छदः ॥१६ ।

[3]रोगो भोगो भावो घातः पाकोऽपि मार्ग इति घञ् च ।
अद्मरघस्मरसृमराः क्मरचि तथा भङ्गुरादयो घुरचि ॥१७॥
विदुरो भिदुरश्छिदुरो विधुरः कुरजन्त इष्यते शब्दः ।
क्वरपीत्वरनश्वरजित्वरसृत्वरगत्वरादिरप्येवम् ॥१८॥
स्थावरो भास्वरः प्रोक्तः कस्वरो वरचीश्वरः ।
पवित्रादय इत्रान्ता नम्र*कम्रादि रान्तकम् ॥१९॥
किन्प्रत्ययान्तश्च पपिर्जगुरिस्ततुरिर्ददिः ।
आधिः सन्धिश्च जलधिर्निधिः किप्रत्ययो भवेत् ॥२०॥
धात्री नेत्रं दात्रं शस्त्रं स्तोत्रं ष्ट्रनि प्रत्ययोक्तं च ।
कां पाठिं कां गणिकां (कां) कृतिमिञ्प्रत्ययान्त इत्येव[4] ॥२१॥

---

१. 'रप्टचि' क. २. 'प्रभवो' क. ३. 'रागो' ख, ङ, च. ४. 'वम्' ङ, च.

* इतः परं क, ङ, च पाठेषु पङ्क्तिरेका लुप्ता ।

[१] ऋषिः क्रिप्रत्ययान्तः स्यादन्यन्तोऽकरणिः स्मृतः ।
इक्प्रत्यये पचिर्नन्दिर्भवत्यस्त्यादयः श्तिपि ।।२२।।
का(रजन्तास्त्व?रान्ताश्चाप्य)काराद्या इफान्तो रेफ इत्यपि ।
मत्वर्थीयसृथां छान्तो? णिनिर्ग्राही च शायिनी ।।२३।।
णच्प्रत्यये व्यावहासी इन्यन्तः सोमविक्रयी ।
घिनुणन्तः शमीत्यादि ण्वुलन्ता भावकादयः ।।२४।।
नर्तकः खनकश्चेति तथा ष्वुन्प्रत्ययो भवेत् ।
वुन्प्रत्ययान्तो लवको वुञन्ता निन्दकादयः । २५।।
थकन्नन्तो गाथकादिः षाकञ्जल्पाक इत्यपि ।
सुभगम्भावुकेत्यादिः खुकञन्तोऽवगम्यताम् ।।२६।।
भावुको वर्षुकश्चैवमुकञन्तश्च का(र?मु)क. ।
ऊकान्तो जागरूकादिः क्लुकनन्तश्च भीलुकः ।।२७।।
क्रुकन् भीरुक इत्यादिस्तृजन्तो भवितैषिता ।
दाता मुण्डयितेत्यादिस्तृनन्तस्त्ववगम्यताम् ।।२८।।
ल्युट्प्रत्ययान्तो भवनं गमनं शयनं यथा ।
ञ्युट् कव्यवाहनादिश्च युचि स्याद् भावनासना* ।।२९।।
ल्युप्रत्यये नन्दनादिः क्विपि भूभृत् सुधीः प्रसूः ।
क्विन्प्रत्यये घृतस्पृग् युक् तथा (दृ?दि)क् तादृगित्यपि ।।३०।।

---

१. 'भूषरिप्र' क, 'ऋषिरिप्र' ख, ङ, च.

---

* कपाठे इतोऽनन्तरं (ललामा?)दिर्मनिनन्तो (श्लो० ३२) इत्यारभ्यते ।

नजिङन्तो भवेत् स्वप्नगब्जागोजादयो विटि ।
ण्विप्रत्यये पादभाक् च सोमपा ग्रामया विचि ॥३१॥

अश्वत्थामसुदामादिर्मनिनन्तोऽवगम्यताम् ।
सुधीवा च सुपीवा च क्वनिबन्तोऽभिधीयते ॥३२॥

भूरिदावा प्रपावा च घृतपावा वनिब्भवेत् ।
विच्प्रत्ययान्तो विज्ञेय उक्थपा:श्वेतपास्तथा ॥३३॥

वनिप् सुत्वा च यज्वा च कञन्तास्तादृशादयः ।
कसुन् विसृप इत्यादि प्रव्रज्यादि क्यपि स्मृतम् ॥३४॥

शप्रत्ययान्त इच्छादिरङि व्याख्या जरा व्यथा ।
जुगुप्सा च बुभुक्षा च बोभूया चेत्यकारतः ॥३५॥

क्तवतुप्रत्ययान्तश्च गतवान् कृतवानिति ।
क्तप्रत्ययान्तः प्रज्ञातः कृतो भूतो वृतो मतः ॥३६॥

मूढो जुष्टो हृतो जातो धृतो नष्टः श्रितो नुतः ।
क्तिन्प्रत्ययान्तः प्रकृतिर्भूतिः शान्तिः श्रुतिर्मतिः ॥३७॥

क्त्वाप्रत्यये भवेद् भूत्वा कृत्वा स्तुत्वैवमादिकम् ।
अनुभूय पराजित्य विगणय्य विहृत्य च ॥३८॥

प्रशमय्य निराकृत्य विनीय ल्यपि तादृशम्* ।
दस्युंकारं खमुञ् प्रोक्तं पायंपायं णमुल् भवेत् ॥३९॥
पवितुं कर्तुमुद्धर्तुं तुमुन्नन्तं च वाचितुम् ।
सांराविणमिनुण्येव ख्युन्याढचंकरणं यथा ॥४०॥

* इतोऽनन्तरं कपाठे 'बुभूषु' (श्लो० ४२) इत्यारभ्यते ।

अलङ्करिष्णू राजिष्णुर्भविष्णुस्तद्वदिष्णुचि ।
आढ्यंभविष्णुः खिष्णुच्च ग्लास्नुः क्स्नुप्रत्यये भवेत् ॥४१॥
अथुच् श्वयथुरित्यादिरालुच्छ्रद्धालुरित्यपि ।
बुभूषुर्भिक्षुराशंसुर्विन्दुरुप्रत्ययो भवेत् ॥४२॥
उणन्तः कारु[1]रित्यादि[2] क्स्नुर्जिष्णुर्भूष्णुरेव च ।
रुप्रत्यये भवेद्दारुरारुर्वन्दारुरित्यपि ॥४३॥
डुप्रत्ययान्तश्च विभुः खचि तद्वद् भुजङ्गमः ।
खशप्रत्ययान्तश्च तथा पण्डितम्मन्य इत्यपि ॥४४॥
खलि स्वाढ्यंभवं प्रोक्तं दुराढ्यंभवमेव च ।
खल्प्रत्ययान्तः सुकरो दुष्करो दुर्लभो यथा ॥४५॥
इति कृत्प्रत्ययान्तानां रूपं किञ्चिन्निरूपितम् ॥

इति नवमः परिच्छेदः

दशमः परिच्छेदः

तद्धितान्तसुबन्तानां रूपं किञ्चिन्निरूप्यते ।
ण्यप्रत्ययान्तो दैत्यादिर्नञन्तः स्त्रैण एव च ॥१॥
स्नञ्प्रत्ययान्तः पौंस्नः स्यादण्यौपगव इत्यपि ।
इञ्यौपगविदाक्ष्यादि फकि दाक्षायणादयः ॥२॥
यञ्प्रत्ययान्तो गार्ग्यादिरणि कांसोऽथ यामुनः ।
आक्रूरो वासुदेवश्च नाकुलः काण आर्जुनः ॥३॥

१ 'रुरप्याशु' ङ. च. २. 'दि करिष्णुर्भूष्णु' क.

*द्वैमात्रो भाद्रमातश्च कानीन इति कीर्तितः ।
ऐरग् भवेच्चाटकैरो गौधेरो ढ्रकि गम्यताम् ॥४॥
छण् पैतृष्वस्रीयस्तद्वन्मातृष्वस्रीय एव च ।
ढञन्तो गार्दभेयादि यति राजन्य इष्यते ॥५॥
घान्तः क्षत्रियशब्दोऽयं कुलीनः खान्त ईरितः ।
यत्प्रत्ययान्तः कुल्यस्तु ढकञ् कौलेयको यथा ॥६॥
माहाकुलीनः खञ्युक्तो दौष्कुलेयो ढकि स्मृतः ।
स्वस्रीयश्छ षुगन्तस्तु मनुष्यो मानुषो यदञ् ॥७॥
काश्मीरकैरलाद्योऽञि गान्धारश्चाणि कौरवः ।
वैनतेयो ढगन्तः स्यादपत्यप्रत्यया इमे ॥८॥
अण् तेन रक्तमित्यर्थे भवेत् काषाय इत्ययम् ।
लाक्षादिभ्यष्ठगत्रार्थे यथा रौचनिकादयः ॥९॥
नक्षत्राद्युक्तकालार्थेऽणाषाढः श्रावणादयः ।
व्रते च शयितर्यर्थेऽण् स्थण्डिलात् स्थाण्डिलो यथा ॥१०॥
अणुद्धृतममत्रेभ्यः कौण्डिकः कालशो यथा ।
तत्र संस्कृतमित्यर्थे मारीचं पायसं यथा ॥११॥
शूलोखाभ्यां यदत्रार्थे शूल्यमुख्यं च तद् यथा ।
दध्नष्ठग् दाधिकोऽर्थेऽस्मिन्नौदश्वितिक ईदृशः** ॥१२॥
ढञ्प्रत्ययोऽपि तत्रार्थे क्षौरेय इति तद् यदा ।
अण् सास्य देवतेत्यर्थे यथैन्द्रो घनि शुक्रियम् ॥१३॥

---

* 'द्वैमातुरो भाद्रमातुर' इति भाव्यम् । ** 'श्विरक' इति भाव्यम् ।

टचण् सौम्यं यति वायव्यं शुनासीर्यादिकञ्छयति ।
ढक्प्रत्ययान्त आग्नेयः स्यान्माहाराजिकं ठञि ।।१४।।
समूहस्तस्य चेत्यर्थे काकं वालाकमेव वा ।
वुञ् *गौत्रकौक्षाद्यत्र यञि कैदार्यमिष्यते ।।१५।।
ठञि कावचिकं चेति यनि ब्राह्मण्यमित्यपि ।
तलन्ता ग्रामताद्यास्ते ठञ्चापूपिकमुच्यते ।।१६।।
यञ्छप्रत्यययोः कैश्यमश्वीयं च निगद्यते ।
तदस्यायुधमित्यर्थेऽणैक्षवं पौष्पमीरितम् ।।१७।।
तदधीते च तद्वेदेत्यण् वैयाकरणो यथा ।
वुन्प्रत्ययान्ताः क्रमकः पदकः सूक्तको भवेत् ।।१८।।
अस्मिन्नस्ति तदित्यर्थेऽण् बैल्व औदुम्बरो यथा ।
तेन निर्वृत्तमित्यर्थेऽण् साहस्रमिति कथ्यते ।।१९।।
अण् सोऽस्य वास इत्यर्थे(वंदिशः खलु?आर्जुनावस्तु)तद्यथा ।
मतुप् तदस्मिन्नस्तीति यथा पुलिनवत्यसौ ।।२०।।
ड्मतुप् कुमद्वतीत्यादि ड्वलच्यपि च नड्वलम् ।
शाड्वलं चापि तत्रार्थे वलजन्तः शिखावलः ।।२१।।
तेन गृह्यत इत्यर्थेऽण् चाक्षुषः श्रावणो यथा ।
ठक् तत्र भवतीत्यर्थे ठगन्तः कान्थिको मतः ।।२२।।

---

* 'गौत्रक' मिति रूपं चिन्त्यम् ।

[1]वुगन्तं कान्थकं प्रोक्तं त्यबुच्चैस्त्यादिरव्ययात् ।
ञप्रत्ययान्तं विज्ञेयं पौर्वं *दाक्षिणमौत्तरम् ॥२३॥
यत्प्रत्ययान्तमध्यं स्या(ट्ठञन्तः पौर्वशालिकः?ट्ठञि पौर्वाधिकादयः) ।
मान्तो मध्यम इत्येव ठञि पौर्वाह्णिकादयः ॥२४॥
एण्यान्तः प्रावृषेण्यः स्याट्ठकि वार्षिकमिष्यते ।
अण् तत्र जात इत्यर्थे स्रौघ्नोऽयं माधुरस्तथा ॥२५॥
यखञ्प्रत्यययोर्ग्राम्यस्तद्वद् ग्रामीण इत्यपि ।
ठपि प्रावृषिकः शब्दो भवार्थेण्येऽपि पूर्ववत् ॥२६॥
स्रौघ्नो माधुर इत्यादि दिश्यगण्यादिकं यति ।
ठञ्यान्तर्गेहिकं चान्तर्मालिकं चावगम्यताम् ॥२७॥
ञ्यप्रत्ययान्तं गाम्भीर्यं ठञ् पारिग्रामिकं भवेत् ।
छान्तोऽङ्गुलीयमित्यादि कलन्तं कर्णिका भवेत् ॥२८॥
ष्ठ(ञ्?न्)पौरोडाशिकं चेति ठञि चाध्यात्मिकादयः ।
तत आगत इत्यर्थेऽण् स्रौघ्नो भवति माधुरः ॥२९॥
ठक्चापणिक इत्यादि भाट्टकं छात्त्रकं वुञि ।
ठञि हौतृकमित्यादि-यति पित्र्यमुदीर्यते ॥३०॥
मयड् व्रीहिमयं चेति, सोऽस्य वासस्तथेत्यणि ।
प्रत्यये माधुरः स्रौघ्नष्ठञ् माहाराजिकं यथा ॥३१॥

---

१. 'वुगन्तः पार्णकः प्रोक्तस्त्यकेत्यादिरव्ययात्' क,
'वुगन्तोऽर्णका प्रोक्तस्त्यबुच्चैत्यादिरव्ययात्' ख, ङ.

---

* पौर्वशालदाक्षिणशालौत्तरशालानामेकदेशग्रहणमत्र कृतम् ।

वुन् वासुदेवकस्तेन प्रोक्तमित्यणि माधुरम् ।
अण् तेन कृतमित्यैन्द्रं तस्येदमिति कापटम् ॥३२॥

यत्प्रत्ययान्तं रथ्यं स्यात् सैरिकं हालिकं ठकि ।
विकारस्तस्य चाणाश्ममञन्तं चैत्रभानवम् ॥३३॥

मयड् गोमयमित्यत्र तथा पिष्टमयं भवेत् ।
मयट् तिलमयं चौ(ष्ट्रं ?ष्ट्रकं) वुञ् गव्यं यति स्मृतम् ॥३४॥

ठक् तेन दीव्यतीत्यर्थे शालाकिकमथाक्षिकम् ।
ठक् तेन संस्कृतं चार्थे दाधिकं शार्ङ्गवेरिकम् ॥३५॥

ठक् तेन तरतीत्यर्थे स्याद्वैमानिकशैबिकम् ।
ठञि गौपुच्छिकः स्यट्ठन् नाविकस्तद्वदाश्विकः ॥३६॥

ठक् तेन चरतीत्यर्थे हास्तिको हांसिको यथा ।
ठक् संसृष्टं च तेनेति ब्राह्मिकः शार्ङ्गवेरिकः ॥३७॥

ठग् भवेत् तत्करोतीति तौ दार्दुरिकशाब्दिकौ ।
ठक् स्यात् तद्धन्ति चेत्यर्थे पाक्षिकश्चापि मार्गिकः ॥३८॥

ण्यप्रत्ययस्तदेत्यर्थे पारिषद्यो यथा स्मृतः ।
ठगस्य पण्यमित्यर्थे स्यात् सौवर्णिकमौक्तिकः ॥३९॥

लवणाट्ठञि विज्ञेयमस्य प्रहरणं ठ(ञि?कि) ।
दाण्डिकः शास्त्रिकष्ठञ्च पारश्वधिक इत्यपि ॥४०॥

याष्टीकोऽपि च शाक्तीक ईकगन्तस्तदा भवेत् ।
आस्तिकष्ठक् तदस्तीति नास्तिकोऽपि च दैष्टिकः ॥४१॥

तदस्मै दीयतेऽर्थे स्याद् गाविको हास्तिकस्तथा ।
नियुक्तस्तत्र चेत्यर्थे ठग्भवेच्छौल्कशालिकः ॥४२॥
ठक् तत्र वसतीत्यर्थे *भिक्षुर्नैकटिको मतः ।
यद्भवेत् तद्वहत्यर्थे रथ्यं युग्यं च तद् यथा ॥४३॥
यड्ढकञ्प्रत्ययान्तौ स्तो धुर्यो धौरेयकस्तथा ।
यत् तत्र साधुः कर्मण्यः सामन्यः सभ्य एव च ॥४४॥
छस्तस्मै हितमित्यर्थे वत्सीयो दन्त्य एव यत् ।
ठक् तेन क्रीतमित्यर्थे यथा साप्ततिकादयः ॥४५॥
वतिः स्यात् तेन तुल्यार्थे विप्रवच्छूद्रवत् तथा ।
त्वतलौ तस्य भावार्थे ब्राह्मणत्वं च शूद्रता ॥४६॥
ष्यञन्तो जाल्यमित्यादि तत्सञ्जातमितीतचि ।
स्यात् तारकितमित्यत्र पुष्पितं चेति तद्यथा ॥४७॥
प्रमाणे द्वयसज्दघ्नञ्मात्राचां विधिरिष्यते ।
ऊरुद्वयसमित्यादि जानुदघ्नं च तद्यथा ॥४८॥
कण्ठमात्रं प्रमाणेऽणि पौरुषं च वतुब्विधौ ।
यावत् तावत् कियानादि तयप् पञ्चतयादिकम् ॥४९॥
तस्य पूरण इत्यर्थे डट् स्यादेकादशादयः ।
मडन्तः पञ्चमस्तुर्यस्तुरीयश्छयतोर्विधौ ॥५०॥

---

* ग्रन्थे 'र्थे स्यादयं पुनरान्तिकः' इति दृश्यते, तच्चिन्त्यम् ।

तीयान्तोऽयं द्वितीयश्च तृतीयश्चापि गम्यताम् ।
मतुप् तदस्यास्त्यस्मिन्नित्यग्निमान् वृक्षवानिति ॥५१॥
दन्तुरो ह्युरजन्तः स्याद्रान्तो मधुरमूषरम् ।
आल्लजन्तः शिखालः स्यादिलजन्तस्तु पिच्छिलः ॥५२॥
अत इनिठनौ स्यातां दण्डी दण्डिक एव च ।
वान्तस्तु केशवो ज्ञेय इलजन्तस्तु तुन्दिलः ॥५३॥
विन्यन्तोऽयं तपस्वीति ग्मिनिर्वाग्मीति कथ्यते ।
वाचालवाचाटौ स्यातामालच्चाटचि कल्पितौ ॥५४॥
पञ्चम्याश्च तसिस्त्वत्तः सप्तम्यास्त्राल् परत्र च ।
सदा दाप्रत्ययान्तश्च र्हिलन्तस्तर्हि कथ्यते ॥५५॥
दानीमन्त इदानीञ्च प्रकारे थाल् यथा तथा ।
थम्वन्त इत्थमस्तातौ पुरस्तादादयो मताः ॥५६॥
अतसुच् परतो ज्ञेय आत्यन्तः पुनरुत्तरात् ।
एनप्यथोत्तरेणेति प्रत्ययेऽप्याचि दक्षिणा ॥५७॥
दक्षिणाहीति चाहीति धान्तस्तद्वद् द्विधा त्रिधा ।
चरटचाढचचरो दीनचरो रम्यचरो यथा ॥५८॥
तमबन्तं पटुतमं श्रेष्ठमिष्ठनि गम्यते ।
तरबाढ्यतरश्चेति पटीयानीयसुन्विधौ ॥५९॥
तिङस्तरप्तमप् चापि भवेच्च कुरुतेतराम् ।
पुनरत्तितमां रूपप्रत्ययः सुप्तिङोर्भवेत् ॥६०॥

वैयाकरणरूपोऽस्तिरूपमित्येवमिष्यताम् ।
कल्पब्देश्य च देशीयः प्रत्ययान्ता इमे यथा ॥६१॥
पटुकल्पः सुहृद्देश्यो जळदेशीय इत्यपि ।
जातीयः पटुजातीयो बहुच् च बहुशोभना ॥६२॥
डतरच् कतरो ज्ञेयो डतमः कतमस्तथा ।
च्वौ दीर्घीभवतीत्येव टज्महाराज इष्यते ॥
एकाहोऽग्निसखश्चेति प्रोक्ताः केचन तद्धिताः ॥६३॥

इति दशमः परिच्छेदः

एकदशः परिच्छेदः

बहुव्रीह्यव्ययीभावद्वन्द्वतत्पुरुषात्मकः ।
अन्यपूर्वोभयपरपदप्राधान्यलक्षणः ॥१॥
चतुर्धेति[१] समासश्च तदुदाहरणं यथा ।
चित्रगू रूपवद्भार्यो ग्रामः प्राप्तातिथिस्तथा ॥२॥
तथा व्यूढरथोऽनड्वान् यक्षो दत्तबलिः पुनः ।
तत् पात्रमुद्धृतान्नं स्याद् बहुसैन्यो जनेश्वरः[२] ॥३॥
ग्रामः शुद्धद्विजश्चेति बहुव्रीहिश्च सप्तधा ।
उपकुम्भमसौ तिष्ठन्[३]निर्मक्षिकमिहास्ति नः ॥४॥

---

१. 'साभ' ख. ङ.   २. 'नृपेश' क.   ३. 'ष्ठे' क.

यथाशक्ति करोतीति यथा यावदमत्रकम् ।
द्वन्द्वाख्यौ पटुगुप्तौ तौ तथैव तरुपर्वतौ ॥५॥
प्लक्षन्यग्रोधमुष्ट्राश्वमित्येवमवगम्यताम् ।
कष्टश्रितोऽयमित्यादि शङ्कुलाखण्ड इत्यपि ॥६॥
कुण्डलस्वर्णमेवैतदस्ति चोरभयं महत् ।
स राजपुरुषश्चाक्षशौण्ड इत्येवमादयः ॥७॥
द्वितीयादिविभक्त्यन्तः समास इति कीर्तितः ।
द्विगुस्तत्पुरुषो ङीपि पञ्चपूलीति पठ्यते ॥८॥
एवं पञ्चकपाल्येककपालीत्यादयो मताः ।
विशेषणसमासश्च *भवेन्नीलोत्पलादयः ॥९॥
स कर्मधारयश्चैव नञ्समासोऽप्यपर्वतः ।
सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ॥१०॥
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।
स्वरादयोऽव्ययाख्याः स्युश्चादयोऽसत्त्ववाचिनः ॥११॥
उभयेऽप्यत्र पठ्यन्ते दृश्यन्ते च स्ववृत्तिषु ।
जाया इत्यादि टाबन्तं दामा सीमेति डापि **च ॥१२॥
चापि स्त्रियां स्यात् कौसल्या पौतिमाष्या तथैव च ।
..........................ङीपि कर्त्री च दन्तिनी ॥१३॥
गोमती दम्पती चैव भवती तरुणीति च ।
ङीष्यङ्गुली शुची चैव पट्वी मृद्वी तथैव च ॥१४॥

---

* इतः परं 'वचनेषु च स' (११) इत्यन्तोंशः खण्डपाठेषु भ्रष्टः ।

** इतः परं 'कर्त्री च' (१३) इत्यन्तोंशः खण्डपाठेषु भ्रष्टः ।

गुरूधसी द्विस्तनी च सुनेत्री सुमुखीति च ।
अश्वक्रीती च बिम्बोष्ठी गजकर्णी तथैव च ।।१५।।

रक्तपुष्पी बृहद्वाली सखी ङीष्विधिभेदतः ।
इन्द्राण्याद्यानुगन्तं स्याद्दीर्घबाहूस्तथोङि च ।।१६।।

श्वश्रूः पङ्गूश्च रम्भोरूर्ङीषि हंसी च सूकरी ।
ङीनन्तं शार्ङ्गरव्यादि ब्रह्मबन्धूस्तथोङि च ।।१७।।

तिन्नन्तो युवतिश्चेति स्त्रियां स्युः प्रत्यया इमे ।
वृक्षः कविः सखा कारुर्गौरित्याद्याश्च केवलाः ।

षड्विधानि सुबन्तानि कीर्तितानि समासतः[१] ।।१८।।

एकादशः परिच्छेदः

द्वादशः परिच्छेदः

अष्टादश तिङस्तत्र परस्मैपदसंज्ञकाः ।
पूर्वे नव नवान्ये स्युरात्मनेपदसंज्ञकाः ।।१।।

त्रिकं यदुभयत्रापि प्रथमः पुरुषः क्रमात् ।
मध्यमः पुरुषः पश्चादुत्तमः पुरुषो भवेत् ।।२।।

एकैकपुरुषस्यैवमेकद्वित्व्यादिकार्थतः ।
एकद्विबहुपूर्वाणि त्रीणि[२] स्युर्वचनानि च ।।३।।

---

१. 'त; ॥ इति पर्यायपदवल्याम् एका' ख. ङ. च.
२. 'नान्यपि' क.

त्वं युवां यूयमित्यर्थे मध्यमस्तैर्युते न वा ।
उत्तमः पुरुषस्तद्वदहमावां वयं त्विति ॥४॥

प्रथमः पुरुषोऽन्यत्र[1] युष्मदस्मद्विवर्जिते ।
भवच्छब्दप्रयोगे तु प्रथमः पुरुषः स्मृतः ॥५॥

लकारार्थाभिधायिन्यो धातुस्थास्तिङविभक्तयः ।
कर्ता भावश्च कर्मेति लकारार्थास्त्रयो मताः ॥६॥

कर्तर्येव भवेन्नित्यं परस्मैपदसंज्ञकम् ।
आत्मनेपदमत्र स्याद्भावे कर्मणि कर्तरि ॥७॥

[2]त्रयो लकारा भूतार्थास्त्रयो भाव्यर्थवाचकाः ।
एकोऽत्र वर्तमानार्थ आशीर्विध्यादिषु द्वयम् ॥८॥

वर्तमानो लटोऽर्थः स्याद् भूतानद्यतनो लङः ।
पदप्रयोक्त्रा चादृष्टो भूतानद्यतनो लिटः ।९॥

भूतमात्रो लुङोऽर्थः स्याद् भाविमात्रं लृटो भवेत् ।
अनद्यतनभाव्यर्थो लुटो लेट् तु श्रुतौ स्मृतः[3] ॥१०॥

क्रियान्तरातिपत्तौ तु[4] भाव्यनद्यतनो[5] लृङः ।
लिङलोटावप्युभौ ज्ञेयावाशीर्विध्यादिवाचकौ ॥११॥

लकारव्यपदेशेन धातुस्थास्तिङविभक्तयः ।
एतानेव लकारार्थान् ब्रुवन्तीत्यवगम्यताम् ॥१२॥

---

१. 'तः' ख. ङ. च. २. 'भूयो' ख. ङ. च. . 'स्थितः' ख. ङ. च. ४. 'च' क.
५. नेऽत्र ,ह्' ख. ङ. च.

सकर्माकर्मकत्वेन द्विधा सर्वेऽपि धातवः ।
कर्मापेक्षक्रियामाहुर्धातवोऽत्र सकर्मकाः ॥१३॥

ओदनं पचति ग्रामं गच्छत्यत्ति तिलान्नरः ।
ददात्यर्थं जनान् पातीत्येवमाद्याः सकर्मकाः ॥१४॥

धातवोऽकर्मकाः प्राहुः क्रियां कर्मानपेक्षिणीम् ।
आस्ते शेते भवत्यस्ति तिष्ठतीत्यादयो हि ते ॥१५॥

उपसर्गवशात् केचिद्धातवोऽकर्मका अपि ।
सकर्मका भवन्त्यत्र विपरीताश्च कुत्रचित् ॥१६॥

*प्रपरापसमन्ववनिर्दुर्व्याङन्यधयोऽत्यपिसूदभयश्च ।
प्रतिना सह लक्षयितव्याः पर्युपयोरपि लक्षणमत्र ॥१७॥

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥१८॥

धात्वर्थं बाधते कश्चित् कश्चित् तमनुवर्तते ।
[१]तमेव विशिनष्टयन्य उपसर्गगतिस्त्रिधा ॥१९॥

सम्बन्धवशतश्चापि त्रिधा सर्वत्र धातवः ।
परस्मैपदसम्बन्धात् परस्मैपदिनो मताः ॥२०॥

आत्मनेपदसम्बन्धादात्मनेपदिनस्तथा ।
भवन्त्युभयपद्याख्याः सम्बन्धादुभयत्र च ॥२१॥

---

* इदं श्लोकार्धं खङचपाठेषु भ्रष्टम् ।

---

१. 'कश्चित् स्वार्थं च धात्वर्थं उपसर्गगतिस्त्रिधा' ख. ङ. च.

लिङ्लोटोर्लङ्लटोरेव कर्तर्यर्थे शबादयः ।
कुर्वन्ति दशधा[१] धातून् दशाध्यायेषु च स्थितान् ॥२२॥
एकैकस्मिन् विकरणे दशस्वेव शबादिषु ।
त्रयस्त्रयो धातवोऽत्र कीर्तिता धर्मकीर्तिना ॥२३॥
परस्मैपदधातुभ्यो धातुरेकः प्रदर्शितः* ।
आत्मनेपदधातुभ्यस्तथैवैकः प्रदर्शितः ॥२४॥
तथोभयपदिभ्योऽपि धातुरेकः प्रदर्शितः ।
अत्यल्पभेदतः प्रोक्ता भूवादिभ्योऽधिकास्त्रयः ॥२५॥

त्रयस्त्रिंशदिति[२] प्रोक्ता धातवो धर्मकीर्तिना ।
भव्येधिपचतिनन्दिध्वंसिव्येञत्तिशीङ्ब्रवीतिहुहा ॥२६॥
धादिविसूनहिषुञशूचित्रतुदिमृङ्मुञ्चयो रुधिश्च भुजिः ।
युजितनिमनिक्रुञ्क्रीञ्वृङ्ग्रहिचुरिपाल्यर्चयश्च शब्वर्ग्याः ॥२७॥
**
शब्लुक्श्लुश्यन् श्नुश्शश्नमुश्नाणिचो भवन्ति[३] त्रितः ।(?)
णिजन्ता धातवः सर्वे मता हेतौ[४] प्रयोजके ।
चुरादयो णिजन्तास्तु[५] स्वतन्त्रेऽन्यत्र च स्थिताः ॥२८॥

---

१. 'धातूनां दशा' ख. ङ. च.
२. 'दिमे प्रो' ख. ङ. च.
३. 'न्तित्रिक्रमादूर्ध्वा‍ऽ' ख. ङ. च.
४. 'तोः' ख. ङ. च.
५. 'श्च' ख. ङ. च.

* इतः परं द्वे पङ्क्ती ख.ङ.च.पाठेषु न दृश्येते ।
** 'शब् शब्लुक् श्लुश्यनः श्नुः शः श्नमुः श्ना णिजूर्ध्वं शप् च ततः क्रमात्' इत्येवं भाव्यम्

इच्छार्थे हि सनन्ताः स्युः सनन्तेऽपि णिजिष्यते ।
यङन्ता यङलुगन्ताश्च पौनःपुन्यभृशर्थकाः ॥२९॥
भोजयत्यात्मजान् मातेत्येवमादि णिजिष्यते ।
बुभुक्षते गृही विप्रान् बुभोजयिषतीति सन् ॥३०॥
बोभुज्यते यङन्तं स्याद् बोभुजीति च यङलुकि ।
आत्मनेपदमेव स्याद् यङन्ते युङलुकीतरत् ॥३१॥
सनादिप्रत्ययान्तेभ्यो लकाराः स्युर्दशैव ते ।
वर्तमाने[१]ऽस्य सामीप्ये भूतार्थे स्मप्रयोगतः ॥३२॥
यावद्योगाच्च भाव्यर्थे पुरायोगाच्च लड् भवेत् ।
अधीयन्ते द्विजा ग्रामे यजन्ते सोमपा मखैः ॥३३॥
भुञ्जतेऽतिथयश्चेति वर्तमाने लडीरितः ।
आयाति श्राद्धदिवसः सूतेऽसौ गर्भिणी सुतम् ॥३४॥
म्रियते काचिदन्येति सामीप्यार्थे च दर्शितः ।
भवन्ति स्म सुताः पाण्डोर्म्रियन्ते स्म क्षणादसौ ॥३५॥
प्राप्नोति स्म पुरं कुन्तीत्येवं भूते लडिष्यते ।
यावद् भवति पुत्रोऽस्य यावत् पालयते महीम् ॥३६॥
तावज्जीवतु राजेति लड् भाव्यर्थे निर्दशितः ।
पुरा प्राकारमाया[२]ति क्षिप्रमेकतरं कुरु ॥३७॥
इत्यादिषु प्रयोगेषु लड् भाव्यर्थे पुरान्विते ।
युधिष्ठिरोऽभवत् पूर्वमजयत् पृथिवीमिमाम् ॥३८॥

---

१. 'ने च सा' ख. ङ. च २. 'न्ति' ख. ङ.

अयजद् राजसूयाद्यैरेवं लङपि[1] मृग्यताम् ।

शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं तिष्ठतु सुचिरं जगति धर्मः ॥३९॥

सन्ध्यामुपास्तां विप्रोऽयमग्निहोत्रं जुहोतु च ।
[2]पूजयत्वातिथीन् काले ददातु धनमर्थिने ॥४०॥

निष्यन्दैश्चन्दनानां स्फटिकमणिशिलावेदिकाः संस्क्रियन्तां
मुच्यन्तां यन्त्रमार्गाः प्रसरतु परितो वारिधारा गृहेषु ।
उच्छ्रीयन्तां समन्तात् स्फुरदुरुमणयः श्रेणयस्तोरणानां
धूयन्तां सौधमूर्धस्वमरपतिधनुर्धामचित्राः पताकाः ॥४१॥

क्षिणोतु कामं शीतांशुः किं वसन्तो दुनोतु माम् ।
गृहाण तव पाथेयं गच्छ कार्यं[3] च साधय ॥४२॥

ताते धनुर्न मयि धर्ममवेक्षमाणे
मुञ्चानि मातरि शरं स्वधनं हरन्त्याम् ।
दोषेषु बाह्यमनुजं भरतं हनानि
किं रोषणाय रुचितं त्रिषु पातकेषु ॥४३॥

पाहि मामम्ब रुद्राणि पाहि मामम्ब पार्वति ।
आशीर्विध्यादिलोडर्थाः प्रयोगेष्वे[4]ऽवस्थिताः ॥४४॥

एवमेव लिङोऽर्थः स्याद् रूपमाशिषि भिद्यते ।
(आसो?अभू)द् दशरथो राजेत्येवं लुङि च मृग्यताम् ॥४५॥

---

१. 'लङि विमृश्यताम्' क. २. 'भोजय' ख' ङ. च. ३. 'मुसा' क.
४. 'पु च स्थि' च.

बहु जगद पुरस्तात् तस्य मत्ता किलाहं

चकर च किल चाटुं[१] प्रौढयोषिद्वदस्य ।

निखिलं इति परोक्षे लिट्प्रयोगो[२]ऽपि मृग्यः

स पुनरिति विकल्पाद्रूपभेदेन युक्तः ॥४६॥

शास्त्रं व्याकरणान्तं तदपि भवेत् प्रक्रियाविभागान्तम् ।

ताः पुनरिट्पर्यन्त्राः स लिडन्तः सोऽपि च थलीडन्तः ॥४७॥

फलिता पनसो बालो लुटीत्येवं निरीक्ष्यताम् ।

मरिष्यामो वयं नूनं लृटीत्याद्यवगम्यताम् ॥४८॥

